# Shringararasa Ashtakam

# શૃઙ્ગારરસાષ્ટકમ્

## Document Information

Text title : shRRingArarasAShTakam

File name : shRRingArarasAShTakam.itx

Category : misc, sahitya, advice, aShTaka

Location : doc_z_misc_general

Author : Kalidas

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : From Kavya Sangraha, A Sanskrit Anthology, Dr. John Haeberlin, 1847

Latest update : April 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 29, 2021

*sanskritdocuments.org*

Shringararasa Ashtakam

# શ꣡ૃઙ્ગારરસાષ્ટકમ્

અવિદિતસુખદુઃખં નિર્ગુણં વસ્તુ કિઞ્ચિત્
    જડમતિરિહ કશ્ચિત્ મોક્ષ ઇત્યાચચક્ષે ।
મમ તુ મતમનઙ્ગસ્મેરતારલ્યઘૂર્ણન્
    મદકલમદિરાક્ષીણીવિમોક્ષો હિ મોક્ષઃ ॥ ૧॥

કદા કાન્તાગારે પરિમલમિલત્પુષ્પશયને
    શયાનઃ કાન્તાયાઃ કુચયુગમહં વક્ષસિ વહન્ ।
અયે કાન્તે મુગ્ધે કુટિલનયને ચન્દ્રવદને
    પ્રસીદેતિ ક્રોશન્ નિમીષમિવ નેષ્યામિ દિવસાન્ ॥ ૨॥

સાયં નાયમુદેતિ વાસરમણિશ્ચન્દ્રો ન ચણ્ડદ્યુતિ-
    ર્દાવાગ્નિઃ કથમમ્વરે કિમશનિઃ સ્વચ્છાન્તરીક્ષે સ્થિતઃ ।
હન્તેદં નિરણાયિ પાન્થરમણીપ્રાણાનિલાશાશયા
    ધાવદ્ઘોરવિભાવરી વિષધરી ભોગસ્ય ભીમો મણિઃ ॥ ૩॥

આયાતિ યાતિ પુનરેવ જલં પ્રયાતિ
    પદ્માકરાણિ વિધુનોતિ ધુનોતિ પક્ષૌ ।
ઉન્મત્તવદ્ભ્રમતિ કૂજતિ મન્દમન્દં
    કાન્તાવિયોગવિધુરો નિશિ ચક્રવાકઃ ॥ ૪॥

ભઙ્ક્ત્વા ભોક્તું ન ભુઙ્ક્તે કુટિલવિસલતા ખણ્ડમિન્દોર્વિતર્કાત્
    તારાકારાસ્તૃષાર્તો ન પિવતિ પયસાં વિપ્રુષઃ પયસંસ્થાઃ ।
છાયામમ્ભોજિનીનામલિકુલસવલાં વીક્ષ્ય સન્ધ્યામસન્ધ્યાં
    કાન્તાવિશ્લેષભીરુર્દિનમપિ રજણીં મન્યતે ચક્રવાકઃ ॥ ૫॥

ગન્ધાઢ્યાસૌ ભુવનવિદિતા કેતકી સ્વર્ણવર્ણા
    પદ્મભ્રાન્ત્યા ચપલમધુપઃ પુષ્પમધ્યે પપાત ।
અન્ધીભૂતઃ કુસુમરજસા કણ્ઠકલનપક્ષઃ
    સ્થાતું ગન્તું દ્વયમપિ સખે નૈવ શક્તો દ્વિરેફઃ ॥ ૬॥

તં વીક્ષ્ય વેપથુમતી સરસાઙ્ગયષ્ટિ-
    ર્નિક્ષેપણવ પદમુદ્ધૃતમર્પયન્તી ।
માર્ગાચલવ્યતિકરાકુલિતેવ સિન્ધુઃ
    શૈલાધિરાજતનયા ન યયૌ ન તસ્થૌ ॥ ૭॥

કા કાવલા નિધુવનશ્રમપીડિતાઙ્ગી
    નિદ્રાં ગતા દયિતવાહુલતાનુવદ્ધા ।
સા સા તુ યાતુ ભવનં મિહિરોહમીયં
    સઙ્કેતવાક્યમિતિ કાકચયા વદન્તિ ॥ ૮॥

ઇતિ મહાકવિકાલિદાસવિરચિતં શ ૃઙ્ગારરસાષ્ટકં સમાપ્તમ્ ।

Encoded and proofread by Aaditya Kalyanaraman

*Shringararasa Ashtakam*

pdf was typeset on April 29, 2021

Please send corrections to *sanskrit@cheerful.com*